पाकाद्योक्तलक्षणाभावेन कषायत्वाभावात् ॥*॥
तरुणज्वरे कषायस्य दोषमाह।
"दोषा बद्धाः कषायेण स्तम्भितास्तरुणे ज्वरे।
स्तम्भन्ते न विपच्यन्ते कुर्व्वन्ति विषमज्वरम् ॥
कषायेण स्तम्भिताः प्रवृत्तये निवारिताः।
यत आह कषायरसगुणान्।
कषायः स्तम्भनः शीतो रूक्षः पित्तकफापहः।
इत्यादि।
स्तम्भन्ते आध्मानं कुर्व्वन्ति। न विपच्यन्ते सुखेन न विपच्यन्ते दुःखं दत्त्वा विलम्बेन विपच्यन्ते इति यावत् ॥ अन्यच्च।
"न च्यवन्ते न पच्यन्ते कषायैः स्तम्भिता मलाः।
तिर्य्यग्विमार्गगा वाते घोरं कुर्य्युर्नवज्वरम् ॥*॥
अनुपस्थितदोषाणां वमनं तरुणे ज्वरे।
हृद्रोगं श्वासमानाहमोहञ्च कुरुते भृशम् ॥"
अस्यायमर्थः। कफादिदोषोपस्थितौ स्वयमेव चेद्भवति वमनं न तद्दोषाय। अनुपस्थितदोषाणान्तु तरुणे ज्वरे वमनं यत्नकृतं हृद्रोगादीन् करोतीत्यर्थः। एतेन वचनेन तरुणे ज्वरे यत्नाद् वमनं निषिद्धम् ॥ * ॥
अवस्थाविशेषे तदपि कर्त्तव्यमित्याह।
"सद्यो भुक्तस्य वा जाते ज्वरे सन्तर्पणोत्थिते।
वमनं वमनार्हस्य शस्तमित्याह वाग्भटः ॥"
वमनं वेति विकल्पो लङ्घनापेक्षया वमनार्हस्येत्यनेन गर्भिण्यतिक्षमातिवृद्धादिनिरासः। वाग्भटोऽत्र वृद्धवाग्भटः ॥
"वमितं लङ्घयेत् प्राज्ञो लङ्घितं न तु वामयेत्।
वमनं क्लेशबाहुल्याद्धन्याल्लङ्घनकर्षितम्।
न कार्य्यं गुर्व्विणीबालवृद्धदुर्ब्बलभीरुभिः ॥"
अनशनमिति शेषः। अनेन वचनेन गुर्व्विण्यादीनामनशननिषेधात् ज्वरे सामे पाचनं निरामे शमनं पथ्यान्नमण्डादिकञ्च दद्यात् ॥ * ॥
पाचनशमनयोर्लक्षणमाह।
"यत् पचत्याममाहारं पचेदामरसञ्च यत्।
यदपक्वान् पचेद्दोषांस्तद्धि पाचनमुच्यते ॥
न शोधयति यद्दोषान् समान्नोदीरयत्यपि।
समीकरोति संवृद्धांस्तत् संशमनमुच्यते ॥"
न शोधयति नोर्द्ध्वाधोमार्गाभ्यां पातयति, नोदीरयति न वर्द्धयति ॥ * ॥ तयोः संप्रदानं कालञ्चाह।
"पाययेदातुरं सामं पाचनं सप्तमे दिने।
शमनेनाथवा दृष्ट्वा निरामं तमुपाचरेत् ॥
तस्मादादौ प्रदेयन्तु पाचनं दिवसत्रयम्।
शमनीयं प्रदेयन्तु पञ्चरात्रं ततः परम् ॥
शोधनं दीपनञ्चैव एकरात्रं प्रदापयेत् ॥"
इत्यत्रिसंहितातः ॥ अन्यच्च।
"शश्वैवाल्पदोषञ्च शमनीयैरुपाचरेत् ॥"
नह।
"लालाप्रसेको हृल्लासो हृदयाशुद्ध्यरोचकौ।
तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता ॥
क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः।
आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम् ॥
भेषजं ह्यामदोषस्य भूयो जनयति ज्वरम् ॥"
भूयो बाहुल्येन। अन्यच्च।
"पाययेद्दोषहरणं मोहादामज्वरे तु यः।
स सुप्तं कृष्णसर्पन्तु कराग्रेण परामृशेत् ॥"
इति वचनादामज्वरे भेषजनिषेधात् कथं सामे ज्वरे पाचनं देयम्। उच्यते निरुपद्रवे सामे ज्वरे पाचनं देयम्। सोपद्रवे तु सामे भेषजं निषिद्धम्। तथा च वाग्भटः।
"सप्ताहात् परतोऽदुष्टे सामे स्यात् पाचनं ज्वरे।
निरामे शमनं स्तब्धे सामे नौषधमाचरेत् ॥"
अदुष्टे निरुपद्रवे। स्तब्धे सोपद्रवे ॥ * ॥ अथ सामान्यज्वरे पाचनं कषायमाह सुश्रुतः।
"नागरं देवकाष्ठञ्च धान्यकं बृहतीद्वयम्।
दद्यात् पाचनकं पूर्व्वं ज्वरितेभ्यो ज्वरापहम् ॥
धान्यकं रौहिषम्। तदलाभादुशीरं दद्यात्। बृहतीद्वयं बृहत्फला सूक्ष्मफला बृहती। क्षुद्रा बृहती चेति। कण्टकारीद्वयं वा दद्यात् ॥ कण्टकारीद्वयं शुण्ठी धान्यकं सुरदारु चेति शार्ङ्गधरेण उक्तत्वात्। नागरादिक्वाथः सर्व्वज्वरेषु ॥*॥ अथ सामान्यतः संशमनीयान्याह सुश्रुतः।
"अथ संशमनीयानि कषायाणि निबोध मे।
सर्व्वज्वरेषु देयानि यानि वैद्येन जानता ॥
वृश्चीरबिल्ववर्षाभूपयः सोदकमेव च।
पचेत् क्षीरावशेषं तत् पेयं सर्व्वज्वरापहम् ॥
वृश्चीरः श्वेतपुनर्नवा। वर्षाभू रक्तपुनर्नवा। तथाच मदनपालः।
"पुनर्नवः श्वेतमूलो वृश्चीरो दीर्घपत्रकः।
पुनर्नवा परा रक्ता वर्षाभू रक्तपुष्पकः ॥"
पाकप्रकारमाह।
"क्षीरमष्टगुणं दद्यात् क्षीरान्नीरं चतुर्गुणम्।
क्षीरावशेषं पातव्यं क्षीरपाके त्वयं विधिः ॥"
द्रव्यात् पलपरिमितात् ॥ अन्यच्च।
"छागक्षाद्विगुणं क्षीरं शिंशपासारमेव च।
तत् क्षीरशेषं क्वथितं पेयं सर्व्वज्वरापहम् ॥
गुडूचीधान्यकारिष्टं पद्मकं रक्तचन्दनम्।
एषां क्वाथः सुप्रसिद्धः सर्व्वज्वरहरः स्मृतः ॥
दीपनो दाहहृल्लासतृष्णाच्छर्द्यरुचीर्हरेत् ॥"
गुडूच्यादिक्वाथः ॥ * ॥ संशोधनं तरुणज्वरिणो निषिद्धं तदाह सुश्रुतः।
"छर्द्दिं मूर्च्छां मन्दमोहं भ्रमतृड्विषमज्वरान्।
संशोधनस्य पानेन प्राप्नोति तरुणज्वरी ॥"
संशोधनस्य लक्षणमाह।
"स्थानाद्बहिर्नयेदूर्द्ध्वमधो वा दोषसञ्चयम्।
संशोधनं तदेव स्याद्देवदालीफलं यथा ॥"
निषिद्धमपि संशोधनमवस्थाविशेषे देयं यत आह।
"रोगे शोधनसाध्ये तु यं विद्याद्दोषदुर्ब्बलम्।
तं समीक्ष्य भिषक् कुर्य्याद्दोषप्रच्यावनं मृदु ॥"
शोधनसाध्यान् रोगानाह।
"सद्योज्वरे विषे जीर्णे मन्दाग्नावरुचौ तथा।
स्तन्यरोगे च हृद्रोगे कासे श्वासे च वामयेत् ॥
जीर्णज्वरगरच्छर्द्दिगुल्मप्लीहोदरेषु च।
शूले शोथे मूत्रघाते क्रिमिरोगे विरेचयेत् ॥"
दोषदुर्ब्बलं दोषैरुपचितैर्दुर्ब्बलं न तु उपवासादिकृशम्। अतएव समीक्ष्येति। अन्यच्च ॥
"चले दोषे मृदौ कोष्ठे नेक्षेतात्र बलं नृणाम्।
अव्यापत् दुर्ब्बलस्यापि शोधनं हि तदा भवेत् ॥"
कुतो बलं नापेक्षणीयमित्याशङ्कायामाह।
तदा तस्यामवस्थायां शोधनं दुर्ब्बलस्यापि दोषदुर्ब्बलस्यापि अव्यापत् भवेत्। छर्द्यादिव्याधिकृत् न भवतीत्यर्थः ॥ * ॥ बलवतः पुरुषस्य पक्वस्य दोषस्य स्वस्थानस्थितस्य शोधनाविधाने दोषमाह सुश्रुतः।
"पक्वोऽप्यनिर्हृतो दोषो देहे तिष्ठन्महात्ययम्।
विषमं वा ज्वरं कुर्य्याद्बलव्यापादमेव च ॥"
पक्वः लङ्घनतिक्ताम्बुपानपेयादिभिः। अनिर्हृतः अधोमार्गेणानुत्सृष्टः। महात्ययं विषमज्वरं चातुर्थकम्। तस्यैव महात्ययत्वादिति गदाधरः ॥ गम्भीरमिति कार्त्तिकः ॥ महात्ययं महाकष्टं वा। बलव्यापादं बलक्षयम् ॥*॥
संशोधनमाह।

"आरग्वधग्रन्थिकमुस्ततिक्ता-
हरीतकीभिः क्वथितः कषायः।
सामे सशूले कफवातपित्त-
ज्वरे हितो रेचनपाचनश्च ॥"

आरग्वध धनवहेरा ॥ अन्यच्च।
"पथ्यारग्वधतिक्तात्रिवृदामलकैः शृतं तोयम्।
पाचनसारकमुक्तं मुनिभिर्जीर्णज्वरे सामे ॥"
इति आरोग्यपञ्चकद्वयम् ॥ * ॥
"अनन्तां बालकं मुस्तं नागरं कटुरोहिणीम्।
पिष्ट्वा सुखाम्बुना कल्कं पाययेदक्षसम्मितम् ॥
कल्कः स्वल्पेन कालेन हन्यात् सर्व्वज्वरानयम्।
विदध्यात् कोष्ठसंशुद्धिं दीपयेच्च हुताशनम् ॥"
अनन्ता सारिवा। इति सारिवादिकल्कः ॥*॥
संशोधनं संशमनञ्च येषां निषिद्धं तानाह।
"पीताम्बुर्लङ्घनक्षीणो जीर्णे भुक्तः पिपासितः।
न पिबेदौषधं यत्तु संशोधनमथेतरत् ॥"
पीताम्बुः पीततिक्ताम्बुः। भुक्तः भुक्तवानित्यर्थः। अत्राध्यवसितादित्वात् कर्त्तरि क्तप्रत्ययः। इतरत् संशमनम् ॥ * ॥
"त्रिफला रजनीयुग्मं कण्टकारीयुतं शटी।
त्रिकटु ग्रन्थिकं मूर्व्वा गुडूची धन्वयासकः ॥
कटुका पर्पटो मुस्तं त्रायमाणा च बालुकम्।
निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः ॥
यवानीन्द्रयवो भार्गी शिग्रुबीजं सुराष्ट्रजा ॥
वचा त्वक् पद्मकोशीरचन्दनातिविषा बला ॥
शालीपर्णी पृश्निपर्णी विडङ्गं तगरं तथा।
चित्रकं देवकाष्ठञ्च चव्यं पत्रं पटोलजम् ॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचनम्।
पुण्डरीकञ्च काकोली पत्रकं जातिपत्रकम् ॥
तालीशपत्रमेतानि समभागानि चूर्णयेत्।
अर्द्धांशं सर्व्वचूर्णस्य किरातं प्रक्षिपेत् सुधीः ॥
एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम्।